# अयोध्या – नन्दिग्रामम्

## अयोध्याकाण्डे पञ्चदशाधिकशततमः सर्गः

रथस्थः स तु धर्मात्मा भरतो भ्रातृवत्सलः।

नन्दिग्रामं ययौ तूर्णं शिरस्यादाय पादुके।।2.115.12।।

ततस्तु भरतः क्षिप्रं नन्दिग्रामं प्रविश्य सः।

अवतीर्य रथात्तूर्णं गुरूनिदमुवाच ह।।2.115.13।।

एतद्राज्यं मम भ्रात्रा दत्तं सन्नयासवत्स्वयम्।

योगक्षेमवहे चेमे पादुके हेमभूषिते।।2.115.14।।

भरत श्शिरसा कृत्वा सन्न्यासं पादुके ततः।

अब्रवीद्दुःखसंतप्त स्सर्वं प्रकृतिमण्डलम्।।2.115.15।।

छत्रं धारयत क्षिप्रमार्यपादाविमौ मतौ।

आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम।।2.115.16।।

भ्रात्रा हि मयि संन्यासो निक्षिप्त स्सौहृदादयम्।

तमिमं पालयिष्यामि राघवागमनं प्रति।।2.115.17।।

क्षिप्रं संयोजयित्वातु राघवस्य पुनस्स्वयम्।

चरणौ तौ तु रामस्य द्रक्ष्यामि सहपादुकौ।।2.115.18।।

ततो निक्षिप्तभारोऽहं राघवेण समागतः।

निवेद्य गुरवे राज्यं भजिष्ये गुरुवृत्तिताम्।।2.115.19।।

राघवाय च सन्यासं दत्त्वेमे वरपादुके।

राज्यं चेदमयोध्यां च धूतपापो भवामि च।।2.115.20।।

अभिषिक्ते तु काकुत्स्थे प्रहृष्टमुदिते जने।

प्रीतिर्मम यशश्चैव भवेद्राज्याच्चतुर्गुणम्।।2.115.21।।

एवं तु विलपन्दीनो भरत स्समहायशाः।

नन्दिग्रामेऽकरोद्राज्यं दुःखितो मन्त्रिभिस्सह।।2.115.22।।

स वल्कलजटाधारी मुनिवेषधरः प्रभुः।

नन्दिग्रामेऽवसद्वीर स्ससैन्यो भरतस्तदा।।2.115.23।।

रामागमनमाकाङ्क्षन्भरतो भ्रातृवत्सलः।

भ्रातुर्वचनकारी च प्रतिज्ञापारगस्तथा।।2.115.24।।

पादुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तदा।

स वालव्यजनं छत्रं धारयामास स स्वयं।

भरत श्शासनं सर्वं पादुकाभ्यां निवेदयन्।।2.115.25।।

ततस्तु भरत श्श्रीमानभिषिच्याऽऽर्यपादुके।

तदधीनस्तदा राज्यं कारयामास सर्वदा।।2.115.26।।

तदा हि यत्कार्यमुपैति किञ्चिदुपायनं चोपहृतं महार्हम्।

स पादुकाभ्यां प्रथमं निवेद्य चकार पश्चाद्भरतो यथावत्।।2.115.27।।

# युद्धकाण्डे सप्तविंशत्युत्तरशततमः सर्गः

श्रुत्वा तु परमानंदं भरतः सत्यविक्रमः ।

हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा ॥ १ ॥

दैवतानि च सर्वाणि चैत्यानि नगरस्य च ।

सुगंधमाल्यैर्वादित्रैरर्चंतु शुचयो नराः ॥ २ ॥

सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा ।

सर्वे वादित्रकुशला गणकाश्चापि संघशः ॥ ३ ॥

अभिनिर्यांतु रामस्य द्रष्टुं शशिनिभं मुखम् ।

भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा ॥ ४ ॥

विष्टीरनेकसाहस्राश्चोदयामास वीर्यवान् ।

समीकुरुत निम्नानि विषमाणि समानि च ॥ ५ ॥

रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना ।

तरुणादित्यसङ्काशं विमानं रामवाहनम् ॥ ३० ॥

धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ।

एतस्मिन्भ्रातरौ वीरौ वैदेह्या सह राघवौ ॥ ३१ ॥

सुग्रीवश्च महातेजा राक्षसेन्द्रो विभीषणः ।

ततो हर्षसमुद्भूतो निस्वनो दिवमस्पृशत् ॥ ३२ ॥

स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते ।

रथकुंजरवाजिभ्यस्तेऽवतीर्य महीं गताः ॥ ३३ ॥

ददृशुस्तं विमानस्थं नराः सोममिवांबरे ।

प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः ॥ ३४ ॥

स्वागतेन यथार्थेन ततो राममपूजयत् ।

मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः ॥ ३५ ॥

रराज पृथुदीर्घाक्षो वज्रपाणिरिवापरः ।

ततो विमानाग्रगतं भरतो भ्रातरं तदा ॥ ३६ ॥

ववन्दे प्रयतो रामं मेरुस्थमिव भास्करम् ।

ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ॥ ३७ ॥

हंसयुक्तं महावेगं निष्पपात महीतले ।

आरोपितो विमानं तद्भरतः सत्यविक्रमः ॥ ३८ ॥

राममासाद्य मुदितः पुनरेवाभ्यवादयत् ।

तं समुत्थाप्य काकुत्स्थश्चिरस्याक्षिपथं गतम् ॥ ३९ ॥

अङ्के भरतमारोप्य मुदितः परिषस्वजे ।

ततो लक्ष्मणमासाद्य वैदेहीं चाभ्यवादयत् ॥ ४० ॥

एतत्ते रक्षितं राजन्राज्यं निर्यातितं मया ।

अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः ॥ ५४ ॥

यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ।

अवेक्षतां भवान्कोशं कोष्ठागारं पुरं बलम् ॥ ५५ ॥

भवतस्तेजसा सर्वं कृतं दशगुणं मया ।

तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् ॥ ५६ ॥

मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ।

ततः प्रहर्षाद्भरतमंकमारोप्य राघवः ॥ ५७ ॥

ययौ तेन विमानेन ससैन्यो भरताश्रमम् ।

भरताश्रममासाद्य ससैन्यो राघवस्तदा ॥ ५८ ॥

अवतीर्य विमानाग्रादवतस्थे महीतले ।

अब्रवीच्च तदा रामस्तद्विमानमनुत्तमम् ॥ ५९ ॥

वह वैश्रवणं देवमनुजानामि गम्यताम् ।

ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् ।

उत्तरां दिशमागम्य जगाम धनदालयम् ॥ ६० ॥